# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ३७

विमृश्य च ततो रामो वयस्यमकुतोभयम् ।
प्रतर्दनं काशिपतिं परिष्वज्येदमब्रवीत् ॥ १॥

दर्शिता भवता प्रीतिर्दर्शितं सौहृदं परम् ।
उद्योगश्च कृतो राजन्भरतेन त्वया सह ॥ २॥

तद्भवानद्य काशेयीं पुरीं वाराणसीं व्रज ।
रमणीयां त्वया गुप्तां सुप्राकारां सुतोरणाम् ॥ ३॥

एतावदुक्त्वा उत्थाय काकुत्स्थः परमासनात् ।
पर्यष्वजत धर्मात्मा निरन्तरमुरोगतम् ॥ ४॥

विसृज्य तं वयस्यं स स्वागतान्पृथिवीपतीन् ।
प्रहसन्राघवो वाक्यमुवाच मधुराक्षरम् ॥ ५॥

भवतां प्रीतिरव्यग्रा तेजसा परिरक्षिता ।
धर्मश्च नियतो नित्यं सत्यं च भवतां सदा ॥ ६॥

युष्माकं च प्रभावेन तेजसा च महात्मनाम् ।
हतो दुरात्मा दुर्बुद्धी रावणो राक्षसाधिपः ॥ ७॥

हेतुमात्रमहं तत्र भवतां तेजसां हतः ।
रावणः सगणो युद्धे सपुत्रः सहबान्धवः ॥ ८॥

भवन्तश्च समानीता भरतेन महात्मना ।
श्रुत्वा जनकराजस्य कानने तनयां हृताम् ॥ ९॥

उद्युक्तानां च सर्वेषां पार्थिवानां महात्मनाम् ।
कालो ह्यतीतः सुमहान्गमने रोचतां मतिः ॥ १०॥

प्रत्यूचुस्तं च राजानो हर्षेण महतान्विताः ।
दिष्ट्या त्वं विजयी राम राज्यं चापि प्रतिष्ठितम् ॥ ११॥

दिष्ट्या प्रत्याहृता सीता दिष्ट्या शत्रुः पराजितः ।
एष नः परमः काम एषा नः कीर्तिरुत्तमा ॥ १२॥

यत्त्वां विजयिनं राम पश्यामो हतशात्रवम् ।
उपपन्नं च काकुत्स्थ यत्त्वमस्मान्प्रशंससि ॥ १३॥

प्रशंसार्हा हि जानन्ति प्रशंसां वक्तुमीदृशीम् ।
आपृच्छामो गमिष्यामो हृदिस्थो नः सदा भवान् ॥ १४॥

भवेच्च ते महाराज प्रीतिरस्मासु नित्यदा ॥ १५॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com